Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४६४७

Title महालक्ष्मीबाह्यपूजनपद्धतिः

Author ✗

Extent ७ पत्राणि Age सं. १९००

Subject धर्मशास्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

महालक्ष्मीकाम्यपूजनपद्धतिः

४६४७

4647
7

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः। अथ महालक्ष्म्याः बाह्यपूजां समारभेत्‌ तत्र तान्त्रिकं वैदिकं वा ध्यानं कृत्वा
प्रतिमादिष्वावाहनादि कुर्यात्‌ तद्यथा आत्मसंस्थामजां शुद्धां त्वामहं परमेश्वरि अरण्या
मिव हव्याशं मूर्त्तावावाहयाम्यहं हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां चन्द्रां हिरण्म
यीं लक्ष्मीं जातवेदो ममावह महालक्ष्मि समागच्छ पद्मनाभपदादिह यथोपचारपूजे
यं त्वद्यैव विनिर्मिते इति मूलेनावाहनमुद्रया आवाहनं कुर्यात्‌ महालक्ष्मि आवाहिता
भव त्वं वेद्यं महिमा मूर्त्तिस्त्वस्यां त्वां सर्वगां प्रभो भक्तिस्नेहसमाकृष्टं दीपवत्स्थापयाम्यहं
प्रालयस्तोहि कथितः कमलं कमलालये कमले कमले चास्मिन्‌ स्थितिं मे कल्पयाकुरु । इति च
मूलेन संस्थापनमुद्रया संस्थापनं ॐ महालक्ष्मि संस्थापिता भव ॐ अस्मिन्‌ वरासने देवि सु
खासीनाऽक्षरात्मिके प्रतिष्ठिता भवेशि त्वं प्रसीद परमेश्वरि इति मूलेन च ॐ महालक्ष्मि सं

© Dharmartha Trust J&K. Digitized by eGangotri

निष्पितात्प्रतिष्ठितां भव ॐ अनन्या त्वं देवेशि मूर्त्तिशक्तिरियं परमो संनिधिं कुरु तस्यां त्वं भक्ता
नुग्रहतत्परे मूलेन च ॐ महालक्ष्मि संनिरुद्धा भव ॐ आज्ञया त्वं देवेशि रूपां मो धेनुगुणां
बुधे आत्मानं दैवतस्तां त्वां निरुणध्मि मातर्गुरो इति मूलेन च ॐ महालक्ष्मि संमुखी भव आज्ञा
नादुर्मे स्वात्वा वैकल्यात्साधनस्य च यद्पूर्णं भवेत्कृत्यं तदा प्रत्यभिमुखा भव मूलेन च ॐ म
हालक्ष्मि संमुखी भव। दृशा पीयूषवर्षिण्या पायत्रा विश्वपूरिके मूर्त्ती वा यत्र संपूर्त्तैः स्थिरा
भव महेश्वरि इति मूलेन च षडंगे सकलीकरणं ॐ महालक्ष्मि सकलीकृता भव ॐ अनंत
वा[illegible] नश्वस्तु श्रोत्र हृदापि लद्युते स्वतेजःपंजरेणाशु वेष्टिता भव सर्वतः ॐ महालक्ष्मि
अवगुंठिता भव मूलमंत्रेण धेनुमुद्रया ॐ महालक्ष्मी अमृतीकृता भव मूलेन मत्स्य
मुद्रया ॐ महालक्ष्मी परमीकृता भव ततः प्राणप्रतिष्ठां कृत्वा आसनादिकं दद्यात् सर्वो
[illegible]न्तर्यामि रूपे देवि सर्वबीजमयं शुभं स्वात्मस्थाये परं शुद्धं आसनं कल्पयाम्यहं ३ आसनं। ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ तांम आवह जातवेदो लक्ष्मीमनपगामिनी यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं इति मूलेन च
ॐ महालक्ष्म्यै नमः आवाहनं समर्पयामि अथ अर्घः ॐ तापत्रयं हरं दिव्यं परमानंदलक्षणं।
तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहं ॐ अश्वपूर्णां रथमध्यां हस्तिनादप्रमोदिनीं श्रीयं
देवीमुपह्वये श्रीर्मादेवीर्जुषतां श्रीमहालक्ष्मीरेष तेऽर्घ्यः स्वाहा ततः पाद्यं यद्भक्तिलेशसंप
र्कात्परमानंदसंभवः तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये तु पाद्यं ॐ कांसोस्मितां हिरण्य
प्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीं पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियं ॐ श्रीमहाल
क्ष्मीरेतत्ते पाद्यं नमः अथ आचमनीयं वेदानामपि वेद्याय देवानां देवतात्मने आचामं कल्पयामी
श शुद्धानां शुद्धिहेतवे ॐ चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां तां पद्मनेमिं
शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि मू० श्रीमहालक्ष्मी एतत्ते आचमनीयं स्वधा अथ
मधुपर्कः मधु ॐ सर्वकालुष्यहीनाय परिपूर्णसुखात्मने मधुपर्कमिदं देवि कल्पयामि प्रसीद मे।

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः तस्य फलानि तपसा नुदंतु मायांतरा बा
ह्या अलक्ष्मीः मू॰ श्रीमहालक्ष्मी एषते मधुपर्कः स्वधा ततः पुनराचमनीयं उच्छिष्टोप्यशुचि
र्वापि यस्य स्मरणमात्रतः शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकं मू॰ श्रीमहालक्ष्मी पुनराचमनी
यं स्वधा अथ तारास्नानं पूर्वं तैलोद्वर्तनपूर्वकं स्नानं कृत्वा अथ तैलोद्वर्तनमंत्रः स्नेहरूपं गृहाणास्ने
हेन लोकनाथे महाशये सर्वलोकेषु शुद्धात्मन् ददामि स्नेहमुत्तमं मू॰ श्रीमहा॰ तैलोद्वर्तनं समः ॐ पंचा
मृतस्नानं पयस्नानमंत्रः ॐ गोक्षीरममृतं शुभ्रं नानारससमन्वितं पृथिव्योषधीनां कं स्यं स्नाना
य मन्वतां विभो पयः पृथिव्यां मू॰ श्रीमहालक्ष्मी नमः पयस्नानं समर्पयामि अथ दधिस्नानं चंद्र
बिंबसमं कांत्या स्वास्थ्यविकारिविवर्जितं रुचिदं परमालक्ष्म गृहाणाद्धिमुत्तमं दधिक्राव्णो॰ मू॰
श्रीमहा॰ दधिस्नानं समर्पयामि अथ घृतस्नानं ॐ इदं घृतं महापुण्यं पवित्रं पापनाशनं ।
गृहाणदेव देवेश स्नानार्थं कृपया विभो तेजोसि मू॰ श्रीमहा॰ घृतस्नानं समर्पया॰ अथ मधुस्नानं ।

© Dharmartha Trust J&K. Digitized by eGangotri

नानारत्नरसोद्भूतंमाक्षिमधुमुत्तमं गृहाणदेवि देवेशीमहालक्ष्मीनमोस्तुते मधुवाता. मू. श्रीम०
मधुस्नानंस. अथशर्करा० रक्तश्वेतेक्षुसंजाताशर्करासुरसातव स्नेहाश्रुचमलायागकल्पितासि
द्ध्यानिधी मू. श्रीम. नमः शर्करास्नानंस० अथशुद्धोदकस्नानं परमानंदबोधाब्धिनिमग्ननिजमू
र्त्तये सांगोपांगमिदंस्नानंकल्पयाम्यहमीशिते स्नानंतवमहालक्ष्म्याःकर्पूरागरुवासितं सु
तीर्थेभ्यःसमानीतंस्नानंतत्प्रतिगृह्यतां ॐउपैतुमांदेवसखःकीर्त्तिश्चमणिनासह। प्रादुर्भूतोस्मि
राष्ट्रेस्मिन्कीर्त्तिवृद्धिंददातुमे मू. श्रीम. एतत्तेस्नानंस० ततःपुनराचमनं ॐउपवित्रःपवित्रोवाशुचिर्वा
पिपासया: स्मरेण्णमात्रतः शुद्धिमाप्नोतितस्मैतेपुनराचमनीयकं मू. श्रीम० पुनराचमनीयंस०
अथवस्त्रं मयाचित्रपरछन्नंनिजगुह्योरुतेजसे निरावरणविज्ञानेवासस्तेकल्पयाम्यहं तंतु
संतानसंसिद्धंकलाकौशलकल्पितं सर्वांगाभरणश्रेष्ठंवसनंपरिधीयतां क्षुत्पिपासामलांज्येष्ठा
मलक्ष्मींनाशयाम्यहं अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् मू. श्रीम० वस्त्रंतेनमः ततो
त्तरीयं यामाश्रित्यमहामायाजगत्संमोहिनीसदा तस्यैतेपरमेशायैकल्पयाम्युत्तरीयकं।

© Dharmartha Trust J&K. Digitized by eGangotri

२ हू॰ श्रीम॰ उत्तरीयसं॰ ततः भूषणानि ॐ स्वभावसुंदरांगायै नानाशक्त्याश्रयायते भूषणानि वि
चित्राणि कल्पयाम्य मरार्चिते गंध द्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियं भू॰ श्री॰ भूषणं समं॰ ततश्चंदनं परमानंदसौभाग्यपरिपूर्णदिगंतरे
गृहाण परमं गंधं कृपया परमेश्वरि मलयाचलसंभूतं नानापन्नगसेवितं शीतलं बकुलामोदं चंद
नं प्रतिगृह्यतां मनसः काममाकूतिं वाचः सत्यमशीमहि पशूनां रूपमन्नस्य मयि श्रीः श्रय
तां यशः श्रीमहा॰ चंदनं सं॰ ततः कुंकुमं सर्वसौभाग्यकरणं देवीनांकीलिवर्द्धनं पवित्रं मंगलं
३ देवि कुंकुमं प्रतिगृह्यतां श्रीमहाल॰ कुं॰ समं॰ ततः सिंदुरं सिंदूरं शोभनं रक्तं सौभाग्यं प्रिय
दर्शनं सुखदं मोहनं चैव सिंदूरं प्रतिगृह्यतां महा॰ सिंदू॰ समं॰ ततो गुलालं रक्तवर्णं सुशोभा
ढ्यं नानारंगसुरंजनं पुत्रदं धनदं चैव गुलालं प्रतिगृह्यतां श्रीमहा॰ गु॰ समं॰ ततो बीरं ।
श्वेतं सुगंधं सुखदं मबीरं दूरवद्धनं अखंडवासनापूर्णं मबीरं प्रतिगृह्यतां महा अबीरं सं॰ २
ततः अक्षताः अक्षताश्च सुरश्रेष्ठाः कुंकुमाक्ताः सुशोभनाः गृहाण देवि देवेशि मया दत्ता हि

© Dharmartha Trust J&K. Digitized by eGangotri

भक्तितः मया॰ अर्घ्य मम॰ ततः पुष्पाणि तुरीयवसनसंभूतं नानागुणमनोहरं आमंदसौरभं
पुष्पं गृह्यतामिदमुत्तमं मिलत्परिमलामोदमत्तालिकुलसंकुलं आनंदिनं दनोद्यानं पद्मा
येकुसुमं नमः कर्दमेन प्रजाभूता मयि संभ्रम कर्दम श्रियं वासय मे कुले मातरं पद्ममालिनीं ।
महालक्ष्मी रेतानि पुष्पाणि वो परं पुष्पेषु वसते लक्ष्मीः प्रीयतां वै क्षमी तथा बहुपुष्पकृतामाला
पुष्पायं प्रतिगृह्यतां इति मालां स॰ ततः पंचपुष्पांजलीन्दत्वा आवारणपूजां कुर्यात् कर्णिका
यां षडंगानि अग्नीशासुरवायव्येषु मध्ये दिक्षु श्रां हृदयदेव्यै नमः श्रीं शिरोदेव्यै नमः २ श्रूं शि
खादेव्यै नमः श्रैं कवचदेव्यै नमः ३ श्रौं नेत्रदेव्यै नमः ४ श्रः अस्त्रदेव्यै नमः इति चतुर्दिक्षु मूले
न पुष्पांजलिः अभीष्टसिद्धिं मे देहि शरणागतवत्सले भक्त्या समर्पये तुभ्यं प्रथमावरणा
र्चनमित्यर्घोदकाञ्जलिं समर्पेत् ततः दिग्दलेषु वासुदेवाय नमः संकर्षणाय॰ प्रद्युम्नाय॰
अनिरुद्धाय॰ ततः विदिग्दलेषु दमनकाय॰ पुंडरीकाय॰ गुग्गुलवे कुरंटकाय॰ इति संपूज्य ।

© Dharmartha Trust J&K. Digitized by eGangotri

दव्याद्दक्षिणे शखनिधये वसुधारासहिताय नमः देव्यावामे वसुमतीसहिताय पद्मनिधये नमः

मू॰ पुष्पांजलिं दत्वा अभीष्टव॰ द्वितीया॰ र्चनं ततः पुष्पांजलिं दत्वा द॰ लाग्रेषु स्वाग्रादिप्रादक्षिण्येन।

बलाकायै न॰ विमलायै न॰ कमलायै न॰ वनमालिकायै न॰ विभीषिकायै न॰ मालिकायै॰ शांकर्यै न॰ व

सुमालिकायै न॰ मू॰ पुष्पांजलिं द॰ अभी॰ तृतीया॰ र्चनं पुष्पांजलिं दत्वा चतुरस्रस्य प्रथमवी

थ्यां प्रासिद्धपूर्वादि लं इन्द्राय न॰ रं अग्नये न॰ यं यमाय न॰ क्षं निर्ऋतये न॰ वं वरुणाय॰ यं वायवे न॰

सं सोमाय न॰ हं ईशानाय न॰ ह्रीं अनन्ताय न॰ आं ब्रह्मणे न॰ मू॰ पुष्पांजलिं दत्वा अभीष्ट॰ चतु॰

चतुरस्रस्य द्वितीयवीथ्यां प्रासिद्धपूर्वादि वं वज्राय न॰ शं शक्तये न॰ दं दण्डाय न॰ पं पद्माय न॰

मू॰ पुष्पांजलिं द॰ अभीष्टेति॰ पंचमा॰ र्चनं पुराणोक्तपूजायान्तु विशेषः श्वेतपुष्पैरंगपूजनं ॐ

ॐ चपलायै नमः पादौ पूजयामि ॐ चंचलायै नमः जानुनी पूजयामि कमलवासिन्यै नमः क॰

टिं पूजयामि ललितायै नमः गुह्यं पूज॰ उत्कण्ठायै नमः कण्ठं पूज॰ मायायै नमः मुखं

५

© Dharmartha Trust J&K. Digitized by eGangotri

मंडलंपुजा॰ श्रीयैनमः शिरसिपुजा॰ महालक्ष्म्यैनमः सर्वांगानिपुजा॰ वनस्पतिरसोत्पन्नोगंधाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानांधूपोयंप्रतिगृह्यतां गंधसंभारसंनद्धं पृथुवस्तुसमुद्भवं सुरासुरनराणांदिध्रपंदेवीगृहाणमे आपःसृजंतुस्निग्धानिचिक्लीतवसमेगृहे निचदेवीमातरंश्रियंवासयमेकुले मू॰ श्री॰ नमः धूपंसमर्पया॰ ततोदीपः सुप्रकाशोमहादीपः सर्वतस्तिमिरापहः सबाह्याभ्यंतरंज्योतिदीपोयंप्रतिगृह्यतां मार्तंडमंडलाखंडचंद्रबिंबमितेजसं निधानदेविदीपायनिर्मितस्तवभक्तितः आर्द्रांपुष्करणींपुष्टिंसुवर्णांहेममालिनीं सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह मू॰ श्रीम॰ दीपंसमर्पयामि॰ ततोषोडशगोधूमपिष्टांमोदकादीन्नानाविधानिपक्वान्नानिद्राक्षादीनिचखाद्यानिनैवेद्यं सत्पात्रसिद्धंसुहविर्विविधानेकभक्षणं निवेदयामिदेवेशिसानुगायगृहाणतत् देवतालयपातालभूतलाधारधान्यजं षोडशाकारसंभारनैवेद्यंतेनमःश्रियै ॐ आर्द्रांपुष्करणींतुष्टिंपिंगलांपद्ममालिनीं चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह मू॰ श्रीमहा॰ नैवेद्यंस॰ आचमनं शिव॥

उच्छिष्टोऽप्यशुचिर्वापि यस्यास्मरणमात्रतः शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकं स्नानादिकृवि
धायाय यतः शुद्धिरवाप्यते एतदाचमनीयं नेमकल स्मीविधियतां मू॰ श्रीम॰ पुनराचमनी
यंसम॰ ततः फलं इदं फलं मया देवि स्थापितं पुरतस्तव तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि।
5 मू॰ श्रीम॰ फलंसम॰ ततो तांबुलं पातालतलसंभूतं वदनांभोजभूषणं नानागुणसमाकीर्णं
तांबुलं देवि ते नमः मू॰ श्रीम॰ तांबुलं समर्पया॰ ततः छत्रचामरे दर्शयेत् ततो यथाशक्तिमू
ल्येन दक्षिणां समर्पयेत् ॐ हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसो अनंतपुण्यफलदं दक्षिणां प्रति
गृह्यतां मू॰ मक्ष॰ सांगा॰ दक्षि॰ स॰ ततोऽर्घः पत्रं पुष्पं फलं॰ इति नालिकेलार्घः ततो पुष्पार्घः पत्रं पुष्पं
फलं तोयं कमलं कमलालये अर्घं दत्तोय देवेशि गृहाण परमेश्वरि ततो पूगीफलार्घः पूगीफलं
सत्तशुभ्रं कर्पूरागुरुवासितं कुंकुमेन समालिप्तं गृहाणार्घं नमोस्तु ते अथ कदलीअर्घः ॥ ५ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कदलीस्तम्भसंभूतं देवानां प्रीतिवर्द्धनं अर्घं गृहाण देवेशि मम सौभाग्यवृद्धये ॥
ततः कर्पूरारात्रिकं श्रियेनारः प्रियन्तामिति दिग्विया ततो कूष्माण्डाद्यैर्मैः फलैः त
त्कालसंभवैश्चैकस्मिन् पात्रे गृहीत्वा सामान्यमंत्रेणार्घदानं महालक्ष्मी नमस्तो
स्तु नमस्ते हरिवल्लभे गृहाणार्घं मया दत्तं सर्वसौभाग्यप्रदायकं कालिकालिनः
स्तुते ततः कर्पूरारात्रिका श्रियेनाः ततः श्रियन्तामिति दिग्विया श्रियं वसोज्ञारल्प्या
ददाति । श्रियं वसाना अमृतत्वमायन् भवंति सत्या समिधा मितद्रौ अग्निशुं।
उपलोकाना। तमब्रवी। नवलक्षो नीराजयेत् ततः पुष्पांजलिं यानि कानि च ति
ततो नमस्कारः ततः श्रीसूक्तं पठित्वा प्रार्थनां कुर्यात् ततः क्षीरोदार्णवसंभू
त कमले कमलालये प्रयच्छ कमलान् कामान् विष्णुवक्षस्थलस्थिते पुत्रान् दे
हि यशो देहि देहि सौभाग्यमेव च अवैधव्यं व्रतं देहि सर्वान् कामान् प्रयच्छ मे

© Dharmartha Trust J&K. Digitized by eGangotri

कान्ति कालिमरूपा कालि विकरालि नमोऽस्तु ते। त्रैलोक्यजननी चाद्यि वरदे भक्तवत्सले।
महाप्रणार्घं मया दत्तं महालक्ष्मी नमोऽस्तु ते ततः प्रार्थना ॐ विश्वाविद्यासि पद्मे
चशङ्खचक्रेतयांबरे लक्ष्मीनिलायया सित्वं मयि नित्या तथा भवेति संप्रार्थ्य ना-
उत्तौ यद्धारखं बाह्ये लक्ष्मीपार्श्वे निवेदयेत् ॐ लक्ष्मि देवि महाप्रणत्वं यन्मया दे
रवेधृतं व्रतं सम्पूर्णतां यातु त्वत्प्रसादा कार्यो मयि त्वया इति ततो वायनदानं षोडश
पिण्डान् षोडशदीपांश्च दद्यात् ब्राह्मणपूजां बालकपूजां च कृत्वा ॐ इंदिराप्रति
मल्लिकातिरिन्दिरा वैदह्यालि च इन्दिरा तारिका नाम्या मिन्दिरायै नमो नमः इति ध
ततः पुण्याहं दीर्घमायुरस्त्वित्यादि प्रतिशेषः दक्षिणा ब्राह्मणभोजनं सौभाग्यसि
नी· कुमारिका· बटुक· भूयसी च संकल्प· दक्षिणां चेत्यादि· तिलकाशिर्वादः

© Dharmartha Trust J&K. Digitized by eGangotri

ततोऽसंख्यकान् गोधूमचूर्णदीपान् पिंडांश्च भुक्त्वा रात्रौ जागरणं कृत्वा चंद्रोदये
फलादियुक्तेन सशंखेन अर्घ्यं दद्यात् नमोऽस्तु ते निशानाथ लक्ष्मीभ्रातर्नमोऽस्तु
ते व्रतं संपूर्णतां यातु त्वत्प्रसादाद्विधो मम मेति ततः नमस्कारं कृत्वा जानुभ्यामव
नीं गत्वा प्रार्थयेत् क्षीरोदार्णवसंभूते कमले कमलालये प्रयच्छ सर्वकामान्मे
विष्णुवक्षःस्थलालये ॐ नंदे रिद्धि यशोदे ऋद्धि सौख्यं सौभाग्यमेव च कालि कालि म
हाकालि विकरालि नमोऽस्तु ते इत्यादिभिः महालक्ष्मीं स्तुत्वा प्रातर्विसर्जयेत्
पंकजं देवि संत्यज्य मम वेश्मनि संविश यथा सुपुत्रं नत्या कं सुखी स्यां त्वत्प्र
सादतः तां म आवह जातवेदो लक्ष्मीमनपगामिनीं यस्यां हिरण्यं प्रभूतं गावो दा
स्योऽश्वान् विंदेयं पुरुषानहं इति देवीविसर्जनं इति महालक्ष्मीव्रतपूजनपद्धतिः ॥

संवत् ९९ आश्विन शुदि ११ नरमझे ...
लिखितमिदं पुस्तकं काश्यपां

२२

॥ जं॰ रवीशंकर ॥

महालक्ष्मी पूज

१५॰

© Dharmartha Trust J&K. Digitized by eGangotri